गायत्री [illegible] शापविमोचन हृदयकवचानि

११५५

[illegible]

श्रीगणेशायनमः॥ ॐ अस्यश्रीब्रह्मशापविमोचनमहामंत्रस्य ब्रह्माऋषिः कामदुघागायत्रीछं
दः भुक्तिमुक्तिप्रदा ब्रह्मानुग्रहीतागायत्रीशक्तिर्देवता ब्रह्मशापविमोचनार्थेविनियोगः ॐगा
यत्री ब्रह्मेत्युपासीत यद्रूपं ब्रह्मविदो विदुः तां पश्यंतिधीराः सुमनसा वाचमग्रत ऊषांत
स्तानि बीजानि ॐ भगवती त्वं ब्रह्मशापविमुक्ता भव ॐ ह्रौं जं सः तत्सवितुर्वरेण्यं सः जं
ह्रौं [illegible] ह्रौं जं सः [illegible] ॐ भुवः भर्गो देवस्य धीमहि सः जं ह्रौं ॐ ह्रौं जं सः ॐ स्वः धियो यो नः
प्रचोदयात् सः जं ह्रौं ॐ ह्रौं जं सः ॐ परो रजसि सावदोम् सः जं ह्रौं ॐ भगवति त्वं उत्कि
ला भव। अस्य श्रीविश्वामित्रशापविमोचनमहामंत्रस्य अस्य नूतन सृष्टिकर्ता विश्वामित्र
ऋषिः वाग्दुघागायत्रीछंदः विश्वामित्रानुग्रहीतागायत्रीशक्तिर्देवता विश्वामित्रशापविमो
चनार्थेविनियोगः ॐ गायत्रीभवान्वग्निमुखाविश्वरूपीमद्रु ज्म क्टे वा सुरचक्रिरेविश्वसृष्टिं
तोकल्याणीसृष्टिकर्त्रीप्रपद्ये यन्मुखनिःसृता देवगर्भाः स्पर्शानस्तान बीजानि तपभिः स्तीर्णा
तानिवै ॐ अथ सर्वाणि बीजानि जपसिद्धिः पराहृते बीजराशिमनोहृतस्ततः शापविमोचनं
ग्रयोत्कीलनं अस्य श्रीवसिष्ठशापविमोचनमहामंत्रस्य निग्रहानुग्रहकर्ता वसिष्ठऋषिः
परब्रह्मस्वरूपिणी विश्वोद्भवानुष्टुप्छंदः वसिष्ठानुग्रहीतागायत्रीशक्तिर्देवता वसिष्ठ

ॐ विम। क्लैं अं अं

ॐ सः ह्रूं

शापविमोचनार्थे जपे विनियोगः ॐ सावित्रीं ब्रह्मेत्युपासीत ज्ञात्वा वन्दे ज्ञांगेऽग्निचित्ताधियल्लयन्तं ध्या
येतिविद्वोरान्गायत्ते ज्ञानसो ऽमृतत्वं भजेते अहं महद्बहुरूपे देवि संध्ये सरस्वति अजरे अमरे
देवि ब्रह्मयोनि नमोऽस्तु ते सेवामर्क परं ज्योतिरर्कज्योतिरहं शिवः आत्मज्योतिरहं सूर्यः सर्वज्यो
तिरसावहं ॐ ष्णो तस्मानि बीजानि ॐ भगवती गायत्री त्वं वसिष्ठशापविमुक्ता भव अथैतत्की
लनं ॐ अस्य श्रीगौतमशापविमोचनमहामंत्रस्य महामेधा गौतम ऋषिः अव्यक्ता गायत्री छंदः
गौतमानुग्रहीता गायत्री शक्तिर्देवता गौतमशापविमोचनार्थे विनियोगः ॐ अग्निहूतं ह्मामि म
हे होतारं विश्ववेदसं अस्य यज्ञस्य सुक्रतुं हं सूस्रवाहवेदेवादेव आसादयेत्विह आगच्छ देवि शी
घ्रं त्वं त्वरब्रह्मसंमिते गायत्री छंदसां मातर्ब्रह्मयोनि नमोऽस्तु ते स्वशांतास्याश्च बीजानियत्र सो
हं भगवति गायत्री छं गौतमशापविमुक्ता भव इति शापविमोचनं ॐ अस्य प्रणवस्य परब्रह्म
ऋषिः परमात्मा देवता देवी गायत्री छंदः श्रीगायत्री प्रसादसिध्यर्थे जपे विनियोगः विश्वामि
त्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः अग्निवाय्वादित्यबृहस्पतिर्वरुणेन्द्रवि
श्वेदेवा देवता गायत्र्युष्णिगनुष्टुप्जगत्यश्छंदांसि श्रीगायत्री प्रसादसिध्यर्थे जपे विनियोगः ॥
शिरसि विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपाभ्यः ऋषिभ्यो नमः मुखे गायत्र्यु

ॐ
विम-
२

त्रिगनुष्टुप्जगतीभ्यश्छंदोभ्यो नमः हृदि अग्निवाय्वादित्यबृहस्पतिर्वरुणेन्द्रविश्वेभ्यो देवताभ्यो
नमः गायत्र्याः विश्वामित्रऋषिः सविता देवता गायत्री छंदः श्रीगायत्रीप्रसादसिध्यर्थे जपे विनियो
गः शिरसि विश्वामित्रऋषये नमः मुखे गायत्रीछंदसे नमः हृदि सवितृदेवतायै नमः गाय
त्रीशिरसः प्रजापतिऋषिः ब्रह्माग्निवाय्वादित्येभ्यो देवताः यजुश्छंदः श्रीगायत्रीप्रसादसिध्यर्थे
जपे विनियोगः शिरसि प्रजापतिऋषये नमः मुखे यजुश्छंदसे नमः हृदि ब्रह्माग्निवाय्वा
दित्येभ्यो देवताभ्यो नमः अथ व्याहृतिन्यासः॥ ॐ भूः हृदये ॐ भुवः मुखे ॐ स्वः वामांसे
ॐ महः दक्षांसे ॐ जनः वामोरौ ॐ तपः दक्षोरौ ॐ सत्यं जठरे एवं न्यस्य गायत्र्या वर्णान्न्यसेत्
तकारं पादांगुष्ठयोः सकारं गुल्फयोः विकारं जंघयोः तुकारं जान्वोः वकारं ऊर्वोः रेकारं
गुदे णिकारं लिंगे यकारं कट्यां भकारं नाभ्यां गोकारं उदरे दकारं स्तनयोः वकारं हृदये स्य
कारं कंठे धिकारं मुखे मकारं तालुदेशे हिकारं नासिकाग्रे धिकारं नेत्रत्रयोः योकारं भ्रुवो
र्मध्ये द्वितीययोकारं ललाटे नकारं पूर्वमुखे प्रकारं दक्षिणमुखे चोकारं पश्चिममुखे।
दकारं उत्तरमुखे यात्कारं मूर्ध्नि व्यापकं न सर्वव्यापी अथ शिरसः ॐ आपो गुह्ये ॐ ज्योतिः
स्तुषोः ॐ रसो वक्त्रे ॐ अमृतं जान्वोः ॐ ब्रह्म हृदये ॐ भूर्भुवः स्वरोम् हृदये ब्रह्मणे नमः शि २

ह्रेंविषमवेस्वाहा शिखायैरुद्रायवषट् कवचेईश्वरायहुं नेत्रत्रयोसदाशिवायवौषट्।
कवचेईश्वरात्मने अस्त्रायफट् भूर्भुवःस्वरोमितिदिग्बंधः अथध्यानं मुक्ताविद्रुमहे
मनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमकुटां तत्त्वार्थवर्णात्मिकां गा
यत्रींवरदाभयांकुशकशेशुभ्रंकपालंगदां शंखंचक्रमथारविंदयुगलं हस्तैर्वहंतीं
भजेत् ॐअस्यश्रीगायत्रीहृदयमहामंत्रस्यब्रह्मादभगवान् ऋषिः अनुष्टुप् छंदः श्री
गायत्रीसावित्रीसरस्वतीदेवता ओंबीजं ईंशक्तिः ऊंकीलकंममगायत्रीसावित्रीसरस्व
तीप्रसादसिध्यर्थेजपेविनियोगः ओंअंगुष्ठाभ्यांनमः ईं तर्जनीभ्यांनमः ऊंमध्यमाभ्यां
नमः ऐंअनामिकाभ्यांनमः औंकनिष्ठिकाभ्यांनमः अः करतलकरपृष्ठाभ्यांनमः ए
वंहृदयादिन्यासः अथध्यानं हृदयकमलमध्येदीपवद्वेदसारं प्रणवमयमतर्क्यं यो
गिहृद्ध्यानगम्यं हरिगुरुशिवयोगं सर्वभूतस्थमेकं सकृदपिमनसामाध्यायतेयस्समु
वर्ण ३ क्तः अचलमचलवर्णं रूपादिहीनंनिखिलनिगमगुह्यंगुह्यमेवंतुसूक्ष्मं अमलं।
विमलतत्त्वेदेविपश्यंतियोमांहृदयकमलमध्येजीवमुक्तोभवेत्ति इतिपंचपूजा ॐ
नमस्कृत्यभगवान्याज्ञवल्क्यःस्वयंभुवंपरिपृच्छति त्वंब्रूहिब्रह्मन् गायत्र्योत्पत्तिंश्रोतु

केना कुबुप्रवत्ति

ॐ विम. २ 3

मिच्छामि ब्रह्मणा तेनोत्पत्तिमहं त्विं परिपृच्छामि ब्रह्म उवाच प्रणवेन व्याहृतयः प्रवर्तन्ते तमस
स्परं ज्योतिः कः पुरुषः स्वयंभूर्विष्णुरिति सो ऽङ्गुष्ठेन सव्यं चार्गलं त्वामं थयते मथ्यमानात्फेनो भव
ति बुद्बुदादण्डं भवति अण्डादात्मा भवति आत्मन आकाशो भवति आकाशाद्वायुर्भवति वायो
रग्निर्भवति अग्नेरापः अद्भ्यः पृथिवी भवति पृथिव्या ओंकारो भवति ओंकाराद्व्याहृतिर्भवति
व्याहृत्या गायत्री भवति गायत्र्याः सावित्री भवति सावित्र्याः सरस्वती भवति सरस्वत्या वेदा भवति
वेदेभ्यो ब्रह्मा भवति ब्रह्मणो लोका भवति तस्माल्लोकान्प्रवर्तन्ते चत्वारो वेदाः सांगाः सोपनि
षदः सेतिहासाः सर्वे ते गायत्र्याः प्रवर्तन्ते यथाग्निर्देवानां ब्राह्मणो मनुष्याणां मेरुः शिखरिणां
गंगा नदीनां गावः पशूनां वसन्त ऋतूनां ब्रह्मा प्रजापतीनामेवमसौ मुख्या गायत्री गायत्र्या यत्री गा
छंदो भवति किं भूः किं भुवः किं स्वः किं महः किं जनः किं तपः किं सत्यं किं वरेण्यं किं भर्गः
किं देवस्य किं धीमहि किं धियः किं यः किं नः किं तत् यादि किं सवितुः किं प्रचोदयात् भूरिति
भूर्लोकः भुव इत्यन्तरिक्षलोकः स्वरिति स्वर्गो लोकः मह इति महर्लोक जन इति जनो लो
कः तप इति तपो लोकः सत्यमिति सत्यलोकः भूर्भुवःस्वरोमिति त्रैलोक्यं तदिति तदसौ
तेजो यत्तेजः सोऽग्निर्देवता सवितुरिति गायत्री अन्नं वै व रेण्यं अन्नमिव प्रजापतिः भर्ग इत्यापो २

वैभर्गः एतावत्सर्वदेवता देवस्येंद्रो वै देवतायदिदं तदिंद्रः तस्मात्तत्सर्वपुरुषोनामविस्मृरिति।
धीमहीतिं तरात्मा यदंतरात्मा सप्राणोधीयत इत्यध्यात्मो किमध्यात्मा तत्परमंपदं योनइति दृष्टि
वीवैयोनः प्रचोदयीति कामइमान्लोकान्प्रच्यावयते यानुदर्शे सोयानुदर्शे सः स्तोत्रमित्येव घर्मे इ
त्येषागायत्री किंगोत्रा कत्यक्षरा कतिपादा कतिशीर्षा कतिकुक्षयः कतिषट् ब्रह्मकवचा सा
ख्यायनसगोत्रागायत्री षट्कुक्षिः चतुर्विंशत्यक्षरागायेत्री केशपास्त्रयः पादाभवंति काशणः
षट्कुक्षयः कानिपंचशीर्षाणि ऋग्वेदोस्याः प्रथमपादो भवति यजुर्वेदोद्वितीयं सामवेदस्तृ
तीयं एवंदिक्कु प्रथमकुक्षिर्भवति दक्षिणाद्वितीयं पश्चिमा तृतीयं उत्तराचतुर्थी उर्ध्वापंच
मी अधराषष्ठी व्याकरणमस्याः प्रथमशीर्षं भवति शीक्षाद्वितीयं कल्पस्तृतीयं निरुक्तं चतुर्थी
ज्योतिषनयनमिति पंचमी किमुल्लक्षणं किमुचेष्टितं किमुदाहृतं लक्षणंमीमांसअथर्वणवे
दोविचेष्टितं छंदोमुदाहृतं कोवर्णः कःस्वरः श्वेतवर्णा उदात्तनुदात्तस्वरः किमक्षरदैवत्यं
अकारादि षट्स्वराणि इमान्लोकानक्षराणि देवतानि भवंति एवंभवतु गायत्री मध्यमाभे
वतु सावित्री पश्चिमसंध्या सरस्वती ध्यानं ब्रह्माणी चतुराननां सकलयां कुंभां करैः स्त्रुक्स्त्रुवौ
विभ्राणां करुणाकांतिरिंदुवदनारक्तरूपिणी बालिकाहंसारोहणाकिलिरं बरमणिर्बिंबाधारम्भू

ॐ वि॰म॰ ६

षितागायत्रीवदनाच्युताभवतुनः संपत्समृद्धिः सदा प्रातः संध्यारक्तपद्मासनस्थारक्तांबरधा
रक्तावर्णारक्तपुष्पारक्तमाल्यारक्तागंधानुलेपना चतुर्मुखीअष्टभुजाद्विनेत्रा दंडाक्षमालाकम
ण्डलुस्रुक्स्रुवधारिणी सर्वाभरणभूषिता गायत्री कौमारी ब्राह्मी हंसवाहिनी ऋग्वेदसंहिता
ब्रह्मदैवत्या त्रिपदा गायत्री षट्कुक्षिः पंचशीर्षाग्निर्मुखा रुद्रः शिखा विष्णुर्हृदया ब्रह्मकव
चा सांख्यायनसगोत्री भूर्लोकव्यापिनी अग्निस्तत्त्वं उदात्तस्वरः गार्हपत्याग्निः ऋग्वेदमका
रः रक्तवर्णा कर्मस्थाने विनियोगः इत्येषा गायत्री ध्याने रुद्राणी नवयौवना त्रिनयना वैयाघ्रच
र्मांबरा खट्वांगी त्रिशिखा तत्त्वलया भीतिर्दधाना बिंको विद्युत्पिंगजटाकलापविल
सद्बालेन्दुमौलिः श्रियो सावित्री हृदि भाविता सवतनं संपत्समृद्धिः सदा माध्याह्ने श्वेतपद्मा
सनस्था श्वेतांबरधरा श्वेतवर्णा श्वेतपुष्पा श्वेतमाल्या श्वेतगंधानुलेपना पंचमुखी दशभु
जा त्रिनेत्रा त्रिशूलाक्षमाला कमण्डलु कपालधारिणी सर्वाभरणभूषिता सावित्री यौवनी मा
हेश्वरी वृषभवाहिनी यजुर्वेदसंहिता रुद्रदैवत्या त्रिपदा सावित्री षट्कुक्षिः पंचशीर्षाग्नि
र्मुखा रुद्रः शिखा विष्णुर्हृदया ब्रह्मकवचा कात्यायनसगोत्री भुवर्लोकव्यापिनी वायुस्तत्त्वं
अनुदात्तस्वरः आहवनीयाग्निः यजुर्वेदमकारः श्वेतवर्णा स्थितिस्थाने विनियोगः इत्येषा सावित्री ६

ध्यानं ध्यायेत्सत्त्वगुणान्वितां चतुर्भुजयुतां नीलोत्पलश्यामलां पौढांशे खस्तुदर्शनीगदयुतांपा
णिस्तुवर्णस्थितां सामांसाममयींस्वरास्वरन्वितांशैलोद्भवांसुन्दरींसद्विद्यांचसरस्वतींभगवतींतु
गर्भिणीं वैष्णवीं सायंसध्याह्नसमयेपद्मासनस्थाहंसांबरधराहंसवर्णांकमलपुष्पाक्षमाला
ह्रस्तगंधानुलेपनाएकमुखीचतुर्भुजाद्विनेत्राचकात्तमालाकमंडलुशंखचक्रधारिणी
सर्वाभरणभूषितासरस्वतीवृद्धावैष्णवीगरुडवाहिनीसामवेदसंहिताविष्णुदैवत्यात्रिप
दासरस्वतीषट्कुक्षिः पंचशीर्षाग्निर्मुखारु[illegible]द्रःशिखाविष्णुर्हृदयाब्रह्मकवचाबद्धकु
सगोत्रीसर्वलोकव्यापिनीसूर्यस्तत्त्वज्वलितस्वरः दक्षिणाग्निःसामवेदमकारंह्रस्ववर्णा
मोक्षस्थानेविनियोगः इत्येषासरस्वतीरक्षागायत्र्यश्चैतासावित्रीहंसवर्णासरस्वतीत्रिशंको
टयर्धकोटीचमेदेहानामराक्षसाः उदयादिनिमग्नांतेसर्वबाधितमश्चाते ततनन शान्ति
नैदैत्यावज्रमूलेनवारिणा महामायीमहारूपीदिव्यासंध्यासरस्वती अजरेअमरेनित्ये
ब्रह्मयोनिर्नमोस्तुते प्रणवेनित्ययुक्तोस्तुव्याहृतीषुचसप्तसु सर्वेषामेवपापानांसंकरे
समुपस्थिते दशशतंसमभ्यर्च्यगायत्रीपावनीमहत् प्रह्लादोविर्वसिष्ठश्चभृगुकः वा
एवपराशरः विश्वामित्रोमहासेनोकपिलः शौनकोमहान् याज्ञवल्क्योभरद्वाजोजमदग्निस्तपो

ॐ
विमं
५
5

निधिः गौतमो मुद्गलः श्रेष्ठो वेदव्यासश्च लोमशः अगस्त्यः कौशिको वत्सः पुलस्त्यो मंकणस्तथा
दुर्वासस्तपसां श्रेष्ठो नारदः काश्यपस्तथा उत्क्रान्तम् उत्क्रान्तत्या मध्ये प्रतिष्ठोन्या सर्ववर्वकं गायत्र
युष्णिगनुष्टुप् च बृहती पंक्तिरेव च त्रिष्टुप् च जगती चैव तथा च जगती मतिः शक्वरी स्वाति
शर्वी श्च दया द्यष्ट तथात्यष्टिः स्मृतः धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः विकृतिः संकृतिः
संकृतिश्चैव तथा विकृतिः संस्कृतिः इत्येषां छन्दसां सप्त क्रमसो वच्मि सांप्रतं भूरिति छन्दो
भुवरिति छन्दो स्वरिति छन्दो भूर्भुवः स्वरोमिति छन्दः दैवी गायत्रीत्येतानि छन्दांसि प्रथ
ममाग्नेयं द्वितीयं प्राजापत्यं तृतीयं सौम्यं चतुर्थमीशानं पंचमं सवितृदैवत्यं षष्ठं बा
र्हस्पत्यं सप्तमं पितृदैवत्यं अष्टमं भगदैवत्यं नवममर्यम्णं दशमं सावित्रं एकादशं त्वाष्ट्रं
द्वादशं पौष्णं त्रयोदशमैन्द्राग्नं चतुर्दशं वायव्यं पंचदशं वामदेव्यं षोडशं मैत्रावरुणं सप्त
दशं भ्रातृव्यं अष्टादशं वैश्वदेवं एकोनविंशं वासवं विंशं वैष्णवं एकविंशं रौद्रं द्वावि
शं कौबेरं त्रयोविंशमाश्विनं चतुर्विंशं ब्राह्मं अकारादिश्च षट् स्वर्गान् आदित्यांतश्च बिं
दुकान् कवचवर्गद्वयं चैवमादिताः तत्त्वेव च दीर्घस्वरेणासंयुक्तो बिंदुनादसमन्वि
तान् व्यापकं विनासेनश्चाद्दशवं च विराणि च प्रह्लादीनि प्रभासद्या विश्वमद्रा विलासि ५

नी प्रभावती जया शोभा कांता दुर्गा सरस्वती विद्रुमा च विशाला च व्यापिनी विमला तथा ॥ तमो
पहारिणी सूक्ष्मा विश्वयोनिर्जया वहा पद्मालया परा शोभा भद्ररूपा ततः शक्तयः क्रमात्स्वरूप
कं प्रभाभा मत्तपीठ पुष्पसंनिभं विद्रुमस्फटिकाकारं पद्मरागसमप्रभं तरुणादित्यसंकाशं
शंखकुंदेंदुसन्निभं प्रवालः पद्मपत्राभं पद्मपुष्पसमप्रभं इंद्रनीलमणिप्रख्यं मौक्ति
केंदु समप्रभं स्वर्णनाभं जगांगेयं वैडूर्यं स्फटिक संनिभं हरिद्राभं स्वर्णधामं रविकांतिस
मप्रभं शुकपिंछसमाकीर्णं क्रमेण परिकल्पयेत् पृथिव्यापस्तथा तेजोवायुराकाशमेव
च गंधो रसश्च रूपञ्च शब्दस्पर्शस्तथैव च घ्राणं जिह्वा च चक्षुस्त्वक् छ्रोत्रं च मनः परं वाक्
पाणिपादं पायुश्च उपस्थं च तथैव च मनो बुद्धिरहंकारं मवाज्ञं च यथाक्रमं स्वं गुष्ठं गु
ल्फं गुल्फं जंघा दौ गुह्यके तथा वृषणं कटिदेशं तु नाभौ चोदरमध्यतः स्तनयोर्हृदयोः कं
ठे वक्त्रे चिबुककोणके चक्षुषोश्च भ्रुवोर्मध्ये ललाटे पूर्ववक्त्रके दक्षिणे चोत्तरे वक्त्रे पश्चि
मे मूर्ध्नि च क्रमात् विश्वामित्रो ऋषिश्चैव गायत्री छंद उच्यते सविता देवताश्चैव मस्त्व
मग्निरुदाहृतं रुद्राः शिखा विष्णुर्हृदयं ब्रह्मयोनिर्ब्रह्मकवचं प्रणवादिपंचभिः प्राणा
न्सर्वलक्षणसंयुक्तं विनियोगं तयोपेतं त्रैलोक्यं शरणाधिकां एतानि द्वादशावस्थाजपकां

ॐ
विम·
६
6

लेविचिंतयेत्‌ अन्यथा निष्फलं चैव इति रुद्रेण भाषितं ॐ मूर्ध्निसंकाशे ब्रह्मन्‌ विष्णुः शिखा
ललाटे रुद्रः भ्रुवोर्मघः चक्षुषोश्चंद्रादित्यौ कर्णयोः शुक्रबृहस्पती नासिके वायुदेवत्यौ
दंतौ पृष्ठ उभयसंध्यौ मुखमग्निर्जिह्वा सरस्वती त्वष्टा ग्रीवः स्वाध्यायान्‌ बृहीना स्तनयोर्वसवः
बाह्वोर्मरुतः हृदयं पर्जन्य आकाशमुदरं नाभिरंतरिक्षं कटिरिंद्रियाणि जघने प्राजा
पत्यं गुह्ये जन्हु कैलासमलया ऊरू विश्वेदेवा जानुभ्यां जान्वोः कौशिक हृदयं जंघयोरय
नद्वयं खुराः पितराः पादौ पृथिवी वनस्पतयो रंगुल्याः रोमाणि नखानि भवंति मुहूर्तास्ते
विग्रहाः केतुर्मासा ऋतवः संध्याकालत्रयमाच्छादनं संवत्सरनिमिषमहोरात्रं आदित्य
श्चंद्रमा एता य एवमेतां स्वतं महिमानं व्याचष्टे सहस्रपरमा देवी शतमध्या शतावरा स
हस्रनेत्री देवी गायत्री शरणमहं प्रपद्ये ॐ तत्सवितुर्वरदायनमः तत्पूर्वजपायनमः
सन्मुखं संपुटं चैव वितंतं विस्तृतं तथा द्विमुखं त्रिमुखं चैव चतुः पंचमुखं तथा षण्मु
खाधोमुखं चैव व्यापकांजलिकं तथा शकटं यमपाशं च ग्रथितं चोल्मुकोल्मुकं प्रलं
बं मुष्टिकं चैव मत्स्यः कूर्मवराहकं सिंहाक्रांतं महाक्रांतं मुद्गरं पल्लवं तथा एते मुद्रा ६
श्चतुर्विंशा गायत्रीं सुप्रतिष्ठिता इति मुद्रा न जानाति गायत्री निष्फला भवेत्‌ ॐ शातरादि

त्र उपनिषत्प्राय नमः ॐ प्रातरधीयानो रात्रिकृतं पापं नाशयति सायमधीयानो दिवसकृ
तं पापं नाशयति सायंप्रातः प्रयुंजानो पापोऽपापो भवति य इदं गायत्रीहृदयं ब्राह्मणः
प्रयतः पठेत् चत्वारो वेदास्त्वधीतो भवति सर्वैर्देवैर्ज्ञातो भवति सर्वेषु स्नातो भ
वति अगम्यागमनात्पूतो भवति अपेयपानात्पूतो भवति अभक्षणात्पूतो भवति
सुवर्णस्तेयात्पूतो भवति सुरापानात्पूतो भवति गुरुतल्पगमनात्पूतो भवति प
तितसंभाषणात्पूतो भवति विश्वासघातकात्पूतो भवति वृषलीगमनात्पूतो भव
ति कृतघ्नागमनात्पूतो भवति अब्रह्मचारी सुब्रह्मचारी भवति अनेन गायत्रीहृद
येनाधीयते क्रतुशतेष्टं भवति षष्टिर्गायत्र्याः शतसहस्राणि जप्तानि फलानि भवे
ति अष्टौ ब्राह्मणान्सम्याग्राहयेत् अथ सिद्धिर्भवति य इदं नित्यमधीयेत ब्रह्मलोके
महीयते ब्रह्मलोके महीयत इत्याह भगवान्ब्रह्मा ॐ सहनाववतु सह नौ भुनक्तु
सह वीर्यं करवावहै तेजस्विनावधीतमस्तु मा विद्विषावहै ॐ शान्तिः शान्तिः शा
न्ति ॐ अस्य श्रीगायत्रीकवचस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामा

छोत्र

निकं छंदांसि [illegible] श्रीगायत्रीसावित्रीसरस्वती देवता ॐ तत्सवितुर्वरेण्यमिति बीजं भर्गो
गा देवस्य धीमहीति शक्तिः धियो यो नः प्रचोदयादिति कीलकं मम गायत्रीसावित्रीसरस्व
वि·म· तीप्रसादसिध्यर्थे गायत्रीकवचस्तोत्रजपे विनियोगः ॐ तत्सवितुर्ब्रह्मात्मने अंगुष्ठा
१ भ्यां नमः वरेण्यं विष्ण्वात्मने तर्जनीभ्यां नमः भर्गो देवस्य रुद्रात्मने मध्यमाभ्यां नमः
7 धीमहि ईश्वरात्मने अनामिकाभ्यां नमः धियो यो नः सदाशिवात्मने कनिष्ठिकाभ्यां न
मः प्रचोदयात् परब्रह्मात्मने करतलकरपृष्ठाभ्यां नमः एवं हृदयादिन्यासः अथ ध्या
नं रक्तश्वेतहिरण्यनीलधवलैर्युक्तां त्रिनेत्रोज्ज्वलां रक्तां रक्तनवस्रजं मणिगणैर्यु
क्तां कुमारीमिमां गायत्रीं कमलासनां करतलैः शंखाब्जयुग्मं वहत्पद्माक्षं च पद्मस्रजं
वंदधतीं हंसाधिरूढां भजे ॐ गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे ब्रह्मसंध्या तु
मे पश्चादुत्तरे मे सरस्वती पावकीं मे दिशं रक्षेत् पावकोज्ज्वलशायिनी नैरृतीं मे दिशं
कात्यायनी रक्षेत् रुद्राणी रुद्ररूपिणी ऊर्ध्वं ब्रह्माणी मे रक्षेद् अधस्ताद् वैष्णवी तथा एवं
दशदिशो रक्षेत् सर्वांगं भुवनेश्वरी तत्पदं पातु मे पादौ जंघे मे सवितुः पदं वरेण्यं क १
र्टिं कल्पपद्मरूपिणी पावमानेर्दिशं रक्षेत् पावमानविशालिनी दिशं कात्यायनी

टिदेशेतु भर्गो नाभिसंत्ये वच देवस्यामेतु हृदयं धीमहीतु गले तथा धियोमेपातु जिह्वायं
यः पदं पातु नेत्रके नः पदं तु ललाटे स्यान्मूर्धानमे प्रचोदयात् तत्कारः पातु मूर्धानं
सकारः पातु भालकं च चक्षुषी मे विकारस्तु श्रोत्रे रक्षेत्तु कारकः नासापुटे र्वकारस्तु रे
कारस्तु कपोलयोः णिकार ऊर्ध्वरोष्ठे तु यकाराधरोष्ठकं आस्यमध्ये भकारस्तु गोकारश्चि
बुके तथा देकारः कंठदेशेतु वकारस्कंधदेशिके स्यकारो दक्षिणं हस्तं धिकारो वाम हस्त ।
तकं मकारो हृदये देत् हिकारो जठरे तथा धिकारो नाभिदेशेतु योकारस्तु
कटिद्वये गुह्यं रक्षेत्तु योकार ऊरुमे नः पदाक्षरं प्रकारो जानुनोरक्षेच्चो कारोजंघदेशिके
दकारो गुल्फदेशेतु यात्कारः पादयुग्मके इदं तु कवचं गुह्यं शत्रुबाधनिवारणं चतुःष
ष्टिकलाविद्या परमैश्वर्य सिद्धिदं जपारंभेतु हृदयं जपान्ते कवचं पठेत् गोस्त्रियो ब्रह्मह
त्यादि नष्टाशेषाः खिल पातकैः मुच्यते सर्वपापेभ्यो ब्रह्मलोके सगच्छति त्रिभिसंत्रयगा
यत्रीकवचं मनसा पठेत् तत्फलं पि वै तेन नित्यं पुरश्चर्याफलं लभेत् स्वरभिन्ना न चक्रा
श्च योनिः कुमीष पंकजं लिंगं निर्याणमुद्रा पश्चाष्टमुद्राः प्रकीर्तिताः वर्णास्वऊँ ड्किादि

ॐ त्वां शुद्धनिर्मलज्योतिषी सर्वतत्त्वमयी वेदेगायत्री वेदमातरं परं ब्रह्मात्मिकां देवीं परं

विमं- ब्रह्मस्वरूपिणी गायत्री सर्वदैवत्यां नदये हेदमातरं इति श्री विश्वामित्रसंहितायां

८ परमरहस्ये गायत्रीकवचं समाप्तं ११८-८२ ॥ ॥ ॥ ॥

४

नं० ११५५